मितखोच्चगाः पुष्टमिष्टं त्वपचयस्थानीचारातिभे नेष्टसम्मत् । यावती यावती रेखा ग्रहाणामष्टवर्गके । तावतीं द्विगुणीकृत्य अष्टाभिः परिशोधयेत् । अष्टोपरि भवेद्रेखा अष्टाभ्यन्तरविन्दवः । अष्टाभिस्तु समं यत्र तत्समं परिकीर्त्तितम् । रेखा ग्रहाच्छुभे देया विन्दवस्त्वितरत्र तु । रेखाविन्दू समानौ चेत् समस्तत्र निगद्यते । रेखाधिक्ये शुभं ज्ञेयं तद्वद्विन्दोरथाशुभम् । श्रीरानन्दस्तथा श्रेयोभोगो राज्यं भवेत्तथा । मलिनोऽथ विपच्चैव हानिमृत्युर्भवेत्तथा । द्व्यादिरेखा द्व्यादिविन्द्वोः फलान्येतान्यनुक्रमात् । रेखायां वत्सरो ज्ञेयः सार्द्धसप्तदिनं समे । अष्टवर्गदशायुः स्यात् दिनं चतुर्षु विन्दुषु" । इत्यष्टवर्गः । "अष्टवर्गशुभैः श्रीमान् कर्म्म कुर्य्याच्छुभग्रहैः । गोचरस्थैस्तदप्राप्तौ तदप्राप्तौ च वेधगैः । व्रतारम्भे विवाहे च यात्रायां क्षुरकर्म्मणि । अविशुद्धाष्टवर्गस्य समस्ता निष्फलाः क्रियाः । सततं दिशति नराणां राशौ मध्येऽष्टवर्गफलं निखिलम् । भावफलं प्रथमार्द्धे दृष्टिफलान्यर्द्धभुक्तेषु" ज्यो०त० । अष्टानामकचटतपयशानां वर्गः । ज्योतिषादौ शुभाशुभज्ञापनाय विशेषरूपेण अष्टधा विभक्तेषु २वर्णसमूहभेदेषु यथा स्वरवर्णाः १६। अवर्गः, काद्योमावसानाः पञ्चपञ्चात्मकाः कवर्गादयः५ । यरलवाः ४यवर्गः । शषसहा४शवर्गः इत्येवमष्टौ कल्पिताः । तेषां विभागक्रमेण संख्याभेदः । "वर्गवर्णप्रमाणञ्च स्वरैस्ताडितं मिथः । पिण्डसंख्या भवेत्तस्य गथा भागैस्तु कल्पना" केरलम् । "स्वं वर्गं द्विगुणं विधाय परवर्गेणान्वितं सप्ततष्ट" इति ज्योति० । तन्त्रोक्ते मन्त्रस्य शुभाशुभज्ञानार्थं अवर्गाद्यनुसारेण ३ पक्षिमार्ज्जाराद्यष्टवर्गे च । यथा आगमकल्पद्रुमे "इदानीं वर्गचक्रस्य विधानमभिधीयते । मन्त्रग्रामविशोधार्थं नामाद्यक्षरपूर्व्वकम् । अष्टौ कोष्ठान् समालिख्य वर्गानष्टौ लिखेत्ततः । पक्षिमार्ज्जारपञ्चास्यश्वानः सर्पाखुदन्तिनः । मेषः क्रमादकारादि वसुवर्गाश्रिता इमे । साध्यसाधकयोः प्रीतिर्ज्ञातव्या जातितः सदा" । बृहच्छ्रीक्रमे "वर्णशुद्धिं समासाद्य मन्त्रं दद्याद्गुरूत्तमः । अवर्गः पक्षिणोज्ञेयो मार्ज्जारस्य कवर्गकः । चवर्गस्य तथा सिंहष्टवर्गस्यैव कुक्कुरः । तवर्गो नाग इत्युक्तो मूषिकस्य पवर्गकः । यवर्गस्य गजोज्ञेयः शवर्गस्यैव मेषकः । पक्षिभुजगयोर्व्वैरं तथा च गजसिंहयोः । मार्ज्जारमूषिकयोश्चैव तथा कक्कुरमेषयोः । भुजङ्गसिंहयो मैत्री मेषमूषिकयोस्तथा । लोकादन्यच्च विज्ञेयं व्यवहारप्रयोगतः" इति तन्त्रसा० । "जीवकर्षभकौ मेदे काकल्यादृद्धिष्टद्धिके । अष्टवर्गोऽष्टभिर्द्रव्यैरिति" वैद्यकोक्ते ४जीविका द्यष्टद्रव्ये । "राज्ञामष्टवर्गस्तु यतोऽयमतिदुर्लभः । तस्मादस्य प्रतिनिधिं गृह्णीयात्तद्गुणं भिषक् । मेदाजीवककाकोलीवृद्धिद्वन्द्वेऽपि चासति । वरीविदार्य्यश्वगन्धा वाराहीश्च क्रमात् क्षिपेत्" वैद्य० । नीतिवेदिनां वर्द्धनीये ५वर्गभेदे च । "कृषिर्वणिक्पथो दुर्गं सेतुः कुञ्जरबन्धनम् । खन्याकरबलादानं सैन्यानाञ्च निवेशनम् । अष्टवर्गमिमं साधु स्वयं परिवर्द्धयेत्" नीतिः ।

**अष्टविध** न० अष्ट विधाः प्रकारा अस्य । राज्याङ्गाष्टप्रकारे कर्मणि तच्च अष्टकर्मशब्दे दर्शितम् । "कृत्स्नं चाष्टविधं कर्म्म पञ्चवर्गञ्च तत्त्वतः" मनुः ।

सुश्रुतोक्ते विषयविशेषविषये छेद्यादौ अष्टप्रकारे शल्यकर्म्मणि तानि च यथा "छेद्यभेद्यलेख्यवेध्यैष्याहार्य्यस्राव्यसीव्यरूपाणि । तेषां विषयविशेषा अपि तत्रैव दर्शिता यथा । "छेद्या भगन्दरग्रन्थिः श्लैष्मिकस्तिलकालकः । व्रणवर्त्मार्बुदान्यर्शश्चर्म्मकीलोऽस्थि मांसगम् ॥ शल्यं जतुमणिर्म्मांससंघातो गलशुण्डिका । स्नायुमांससिराकोथो वल्मीकं शतपोनकः॥ अध्रुषश्चोपदंशाश्च मांसकन्द्यधिमांसकः । भेद्या विद्रधयोऽन्यत्र सर्व्वजादग्रन्थयस्त्रयः ॥ आदितो ये विसर्पाश्च इद्धयः सविदारिकाः । प्रमेहपिड़काशोफस्तनरोगावमन्थकाः । कुम्भीकानुशयीनाड्यो वृन्दौ पुष्करिकालजी । प्रायशः क्षुद्ररोगाश्च पुप्पुटौ तालुदन्तजौ ॥ तुण्डिकेरी गिलायुश्च पूर्व्वं ये च प्रपाकिणः । वस्तिस्तथाश्मरोहेतोर्म्मेदोका ये च केचन ॥ लेख्याश्चतस्रो रोहिण्यः किलासमुपजिह्विका । मेदोजो दन्तवैदर्भो ग्रन्थिवर्त्माधिजिह्विका ॥ अर्शांसि मण्डलं मांसकन्दी मांसोन्नतिस्तथा । वेध्याः सिरा बहुविधा मूत्रवृद्धिर्दकोदरम् ॥ एष्या नाड्यः सशल्याश्च व्रणा उन्मार्गिणश्च ये । आहार्य्याः शर्करास्तिस्रो दन्तकर्णमलाश्मरी ॥ शल्यानि मूढगर्भाश्च वर्चश्च निचितं गुदे । स्राव्या विद्रधयः पञ्च भवेयुः सर्व्वजाहृते ॥ कुष्ठावै वायुः सरुजः शोफो यश्चैकदेशजः । पाल्यामयाः स्तीपदानि विषजुष्टञ्च शोणितम् ॥ अर्व्वुदानि विसर्पाश्च ग्रन्थयश्चादितस्तु ये । त्रयस्त्रयश्चोपदंशाः स्तनरोगा विदारिका ॥ शौषिरो गलशालूकम् कण्टकाः कृमिदन्तकः । दन्तवेष्टः सोपकुशः शीतादोदन्तपुप्पुटः ॥ पित्तास्त्रकफजाश्चौष्ठ्याः क्षुद्ररोगाश्च भूरिशः । सीव्या मेदःसमुत्थाश्च भिन्नाः सुलिखिता गदाः ॥ सद्योव्रणाश्च ये चैव चलसन्धिव्यपाश्रयाः । न क्षाराग्निविषैर्जुष्टा न वा मारुतवा-